[६६९] नस् नासिकाया यत्तस्क्षुद्रेषु । (म. भा. ३.४२)

नासिकाया नस्भावो वक्तव्यः यत् तस् क्षुद्र इत्येतेषु परतः । [1]नस्यम् । 'नस्तः' (काठ सं. १२.१२) । नःक्षुः ।

[६७०] यति वर्णनगरयोर्नेति वक्तव्यम् । (म. भा. ३.४२)

नासिक्यो वर्णः । नासिक्यं नगरम् (म. भा. ३.४२) ॥

## धात्वादेः षः सः । (६४/२२६४)

[2]धातोरादेः [3]षकारस्य स्थाने सकारादेशो भवति । षह – सहते । षिच – सिञ्चति । धातुग्रहणं किम् ? षोडश । षोडन् । [4]षण्डः । षडिकः । आदेः इति किम् ? कषति । [5]लषति । कृषति ।

'आदेश प्रत्ययोः' (८.३.५९/२१२) इत्यत्र षत्वव्यवस्थार्थं षादयो धातवः केचिदुपदिष्टाः । के पुनस्ते ? ये तथा पठ्यन्ते । अथवा लक्षणं क्रियते, अज्दन्त्यपराः [6]सादयः षोपदेशाः स्मिस्विदिस्वदिस्वञ्जिस्वपितयश्च[7], सृपिसृजिस्तृस्त्यासेक्सृवर्जम् ।

[६७१] सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रतिषेधो वक्तव्यः । (म. भा. ३.४२)

षोडीयति । षण्डीयति । ष्ठीवति । ष्वष्कते । ष्ठिवु इत्यस्य द्वितीयस्थकारष्ठकारश्चेष्यते । तेन तेष्ठीव्यते, टेष्ठीव्यते इति चाभ्यासरूपं द्विधा भवति ॥

## णो नः । (६५/२२८६)

धातोरादेः [8]इत्यनुवर्तते । धातोरादेर्णकारस्य नकार आदेशो भवति । णीञ् – नयति । णम – नमति । णह – नह्यति । धात्वादेः इत्येव, अणति । सुब्धातोरयमपि नेष्यते, णकारमिच्छति णकारीयति । 'उपसर्गादसमासेऽपि णोपदेशस्य' (८.४.१४/२२८७) [9]इत्यत्र णत्वविधेर्व्यवस्थार्थं णादयो धातवः केचिदुपदिश्यन्ते । के पुनस्ते ? ये तथा पठ्यन्ते । अथवा लक्षणं क्रियते, [10]सर्वे णादयो [11]णोपदेशाः, [12]नृतीनन्दिनर्दिनक्कनाटिनाथृनाधृवर्जम्[13] ॥

## लोपो व्योर्वलि । (६६/८७३)

धातोः इति प्रकृतं यत् तद् धात्वादेः इति पुनर्धातुग्रहणान् निवृत्तम् । तेन धातोरधातोश्च वकारयकारयोः वलि परतो लोपो भवति । [14]दिव् – दिदिवान्, दिदिवांसौ, दिदिवांसः । ऊयी – ऊतम् । क्नूयी – क्नूतम् । 'गोधाया ढ्रक्' (४.१.१२९/११३५) गौधेरः । पचेरन् । [15]यजेरन् । [16]वकारस्य–'जीवेरदानुक्' (द.उ. १.१६३), जीरदानुः । स्त्रिवेः – आस्त्रेमाणम् । 'उणादयो बहुलम्' (३.३.१/३१६९) इति बहुलवचनाच् 'च्छ्वोः शूडनुनासिके च' (६.४.१९/२५६१) इति ऊठ् न भवति । वलि इति किम् ? ऊय्यते । क्नूय्यते । पूर्वं लोपग्रहणं किम् ? वेरपृक्तलोपात् पूर्वं वलि लोपो यथा स्यात् । कण्डूयतेः क्विप्-कण्डूः । लोलूयतेः[17] – लोलूः । व्रश्चादीनामुपदेशसामर्थ्यात् वलि लोपो न भवति । वृश्चति । वव्रश्च इत्यत्रापि हि सम्प्रसारणहलादिःशेषयोर्बहिरङ्गत्वात् प्राप्नोति ॥

---

1. नस्यानि (काठ. सं. 38.3) 2. धात्वादेः फ. 3. वर्तमानस्य इत्यधिकम् क. 4. षण्डः नास्ति फ. 5. मिषति क. फ. ह. 6. सर्वे इत्यधिकम् फ. ह. 7. मकारवकारयोरनज्दन्त्यत्वात् न भवतीति अप्राप्ते विधानम् इत्यधिकम् ह. ड. 8. इति वर्तते फ. 9. इति णत्वव्यवस्थार्थं फ. 10. अज्दन्त्यपराः सर्वे फ. 11. नोपदेशाः क. 12. नृति क. 13. इति इत्यधिकम् फ. 14. दिव् नास्ति फ. 15. यजेरन् नास्ति फ. 16. वकारस्य नास्ति क. 17. क्विप् इत्यधिकम् क. ह.